The पार्वतीलोचन of भरतार्णव, ७ ४८९ is—००।।००ऽऽ।।।।ऽ।।, a tala of 16 मात्राs The स० चूडा० p 18, no 93 gives two varieties and since the second variety of स० चूडा० shows ऽऽऽ।ऽऽ०० the reading मगणाल्ला of P is preferable It must however be remembered that the second variety of स० चूडा० is of 12 मात्राs omitting one द्रुत in the middle The पार्वतीलोचन of स० रत्ना० ५ २५६ is—ऽऽऽ।ऽऽऽ००

सिंहविक्रीडिते ताले लो पगा यगणात्प्लुत ॥ ९२ ॥

'ततनत्ता । धिधिधिद्धि द्रें त्थोंहिं कथउ । गत्थउगा ।
तकट दांता । मकट् थुगा । नग थुगत्ता । ततक्ट
धिद्धिकट । द थिरगि द थिरगि द्रें
। । ऽ ऽ । ऽ ऽ ऽ

इति सिंहविक्रीडित[2] ॥ ७२

पूर्णचन्द्राभिधस्ताल स्थित्या चन्द्रकलाकृति ।
द्रुतमाने द्रुतैर्ज्ञेयो लघुभिस्त्रिंशन्मात्रिक ॥ ९३ ॥

एको द्वौ च त्रयश्चैव चत्वार पञ्च च क्रमात् ।
एव च [3]व्युत्क्रमेणैते द्रुतास्तु लघवोऽथवा ॥ ९४ ॥

'तातत्ता । तगधिगि ता । तग धिगि थउंट ।
नग झिगि दुगगि ता । झिझि नग्ध ग्विण ।
द्रें तकुन्न पुपु ता झिझिगिट्टे धिधे ता ।
लघुभिरा ॥

इति पूर्णचन्द्रताल[5] ॥ ७३

---

1 P —द्रा थहिं कथउ कथउ गा ना ना तानग थुग तानग कटाधाद कटद धिगगद धिरगिद्रें । । ऽ ऽ ऽ ऽ इति सिंहविक्रान्ति ॥
O follows P but reads कथउ only once, and gives । । ऽ ऽ । ऽ ऽ ऽ following H.

2. This is a tala of 15 मात्रा s The सिंहविक्रीडित of भरता० ७ २४८ is a ताल of 19 मात्रा s— । ऽ ऽ । ऽ ऽ ऽ । ऽ The स० चूडा० p 12, no 25 makes it a ताल of 17 मात्रा s by adding ल्गं at the end of the type given by our text The स० रत्ना० ५ २७२ gives yet another variety of 24 मात्रा s

3 H & K —त्वं च वा क्रमेण

4 P.—ता तगा तगधिग ता तगा गग थउ ईं नगशिगि दुगशगि ता शि शि नरर ग्विण द्रें तन्नुट पुपु ता नगान्गि धिधि ता । लघुभिरा ॥ O reads ल्गाझिग ईं ता at the end and follows P otherwise

5. This is a tala of either 15 + 15 द्रुत s or 15 + 15 लघु s i e of 15 or 30 मात्रा s respectively. There is no such tala in भरतार्णव,

पृथ्वीकुण्डलतालस्तु जायते षष्टिमात्रिकः ।
[1]तालरत्नाकरे नाम तस्मास्माभिः प्रतिष्ठितम् ॥ ९५ ॥

पृथ्वीकुण्डलताले स्युर्नयौ नो नमभा यभौ ।
यभौ तो यगणश्चैव जगणाच्च गुरु क्रमात् ॥[2] ९६ ॥

[3]तक्कि धिक थुग धिद्धि । दैंथउ । तकथुगु धिक्कि ।
थुगि थुद्दों । तत्ता । दिरि गिडि दत्थुउ गत्थउ गा दिगि ।
थुग थुंग थों । गत्थउ धिगि तगि ता । कत्थउ गा ।
तक्कि धिगि थुगु ता तत घा । किट कट दथों ।
थुग किथु गुगण झिगि दुग झिगि झिङ्झें ।
गण गण दुग झिझिगिण दुगझि दुगझिगि
झें झिं पुपु । डिं पुपु । पुपु ताझें । णगझिगि झें ।

सं० चूडा० or सं० रत्नाकर. But cf the following from Bharatakośa, p. 376—
पूर्णताल —देशीताल
एकादेकान्ततो वृद्धिह्रासाभ्यां क्रमतो द्रुतैः ।
बीजपूराकृतिधरैः पञ्चविंशतिसङ्ख्यकैः ।
पूर्णतालः समादिष्टः पूर्णविश्रम्भरावृता(त) ॥
—कुम्भः

1. P.—तालरत्नाकरनामैतस्मास्माभिः०
2. H.—पृथ्वाकुण्डलताले स्युर्नयौ नो नमभायभौ ।
यभौ तौ यगणश्चैव जगणाथ गुरु क्रमात् ॥
O.—reads नयो तो न रुभायभौ in v. 96b P.—नयौ तो नमभायभौ०
The Bharatakośa, p. 380 quotes vv. 95-96 as below :—
पृथ्वीकुण्डलतालस्तु जायते षष्टिमात्रिकः ।
तालरत्नाकर नामे(मै)तस्मास्माभि प्रतिष्ठितम् ॥
पृथ्वीकुण्डलताले स्युर्नौ यस्तौ ननमायतौ ।
यतौ तो यगणश्चैव जगणाच्च गुरु. क्रमात् ॥
ǀ ǀ ǀ, ǀ S S, S S ǀ, ǀ ǀ ǀ, S S S, S ǀ ǀ ǀ S S, S ǀ ǀ, ǀ S S, S ǀ ǀ, S S ǀ,
ǀ S S, ǀ S ǀ, S–४० गुरव, २० लघवः
—सुधा(कृश)
3. P—तकि धिकथुगु धिद्धिं थउ तक थुगु धिकि थुगि थउ दां तत्त दिरि गडि दत्थउ गत्थउ गा। गदिगि दिगि थुगु थुगु थों गथउ धिगि तागिता (तागिता in O.) कत्थउ गा तकि धिगि थुगु ता ता तत्ता। त्रिड किड दथों (किट किड दोंथों in O)

तत्त । तत्त । तग धिगि कि तत्त । गधिकि ततत्त ।
तह्नि खर्हि चिकुट थह्नि थह्नि थरि थरि गि ।
तग थुगु धै द्धें टें द्रें

। । । । S S S S । । । । । S । । S । । । S S S । । ।
S S S । । S S । । S S । S

प्रस्तारजाश्च ये ताला [1]ससङ्ख्यानिर्मिताश्च ये ।
तालरत्नाकरत्वात्तेऽमुष्मिन्सोपाश्रया कृता ॥ ९७ ॥

इति पृथ्वीकुण्डलताल [2] ॥ ७४

इति सोपाश्रयस्तालसमुच्चयो निर्णयः ॥

सङ्ख्यादियुक्त कलितैस्सार प्रस्तारविस्तारममु विदित्वा ।
यो वेत्ति सोपाश्रयतालमान सङ्गीतविज्ञेषु स एव धन्य ॥ ९८ ॥

इति मलधारगच्छमण्डनश्रीराजशेखरसूरिशिष्यवाचनाचार्यश्रीसुधाकलशविरचित स्वोपज्ञ सङ्गीतोपनिष सारोद्धार प्रस्तारादिसोपाश्रयतालप्रकाशनो नाम द्वितीयोऽध्याय [3] ॥ छ ॥

थुग झधु गणग (गि in O) झिगि दुग णगि त्रिङ्गें । गण गण दुग झिदुग (झिंगण दुग in O) झिग ण झिं धुधु ढिं धुधु धुधु ता ण णग (णग) झिग ण तत्त तत्त ताग धिगि तत्त नग (ताग in O) धिग तत्तत तर्हि र्पहि त्रिकुट थहि थरि थरि गितगधु मुद्र (थक थुग द्रौ in O) । । । । S S S S S S । । । । S S S S । । । S S S । । S S S । । S S । । S S S । S ।

The मात्राs in O are — । । । । S S S S । । । S S S S । । । S S S । । । S S S । । S S । । S । S

1 P — ससज्ञानिर्मिताश्च॰

2 There is no such tala in भरत॰ स॰ चूडा॰ or स॰ रत्ना॰ This tala of 60 मात्राs according to v 95 of text is called ताल रत्नाकर by Sudhakalasa who probably introduced this tala just as Sarngadeva introduced a tala after his own name in his सं॰ रत्ना॰ ५ ३११

3 O reads the colophon as — इति सङ्गीतोपनिषत्सार प्रस्तारादिसोपाश्रयी ताल प्रकाशनो नाम द्वितीयोऽध्याय ॥

तृतीयोऽध्यायः ।

यो [1]वीतरागस्य परात्मनोऽपि
गुणानुबद्धं[2] गणरागशुद्धम् ।
पुण्यैकलोभात् परया च भक्त्या
गायेत्सुगीतं स तु मुक्तिगामी ॥ १ ॥

उद्ग्राहादौ ध्रुवपदे तथाऽऽभोगे गणा[3] शुभाः ।
निधेया शुभदाम्ने [4]हि गीतकर्तुः प्रभोरपि ॥ २ ॥

के गणाः कुत उत्पन्नाः किंरूपाः किंफलप्रदाः ।
किंदेवाः कथमुच्चार्याः किञ्चित् तल्लक्ष्म सूच्यते[5] ॥ ३ ॥

सृष्टिपालनसंहारकर्तारो भुवनत्रये ।
ब्रह्म विष्णु हरास्तेऽतो [6]विश्वं विश्वं त्रयात्मकम् ॥ ४ ॥

सर्वशुक्रमयो ब्रह्मा विष्णुर्मांसमयः स्मृतः ।
शम्भुश्चास्थिमयो देहे पिण्डेष्वेवं (पिण्डश्चैवं[7]) त्रयीमयः ॥ ५ ॥

एका मूर्तिस्त्रयो भागा ब्रह्माविष्णुमहेश्वरः[8] ।
एकैव हि त्रयीभूता त्रयी चाप्येकता गता[9] ॥ ६ ॥

अतस्तत्त्रयसंयोगान्मूर्तयोऽष्टौ विजज्ञिरे ।
पृथ्व्यप्तेजांसि वायुः खं सूर्यचन्द्रात्मलक्षणाः ॥ ७ ॥

---

1 P.—गीतरागस्य.
2 P—गुणानुविद्धं
3 H & K—गुणा.
4. P.—च गीतर्तु
5 P.—किञ्चिल्लक्ष्मसूच्यते ।
6 P.—विश्वं विश्व H. & K.—विश्वविश्वं
7. P.—पिंड चैव.
8 H. & K—°महेश्वर । P.—विष्णुमहेश्वरा ।
cf: Bṛhaddeśī, p. 21. — तथा चाह नारदः—
देवकुलमुख्यत्वा षड्जगान्धारमध्यमाः,
एतेषां देवता ज्ञेया ब्रह्मविष्णुमहेश्वराः ॥
9. H & K—गता ।

पृथ्व्यादिपञ्चभूतैर्युक् सूर्यचन्द्रात्मसंयुतम् ।
नृदेहं निर्ममे स्रष्टा स्वाष्टमूर्तिमयं परम् ॥ ८ ॥

मर्त्यो महोत्तमश्चैवं गीतकर्ता[1] स एव हि ।
गीतप्रभुः स च प्रायो गणास्तच्छुभसूचकाः ॥ ९ ॥

धात्रादेशात् सरस्वत्या लोकानां हितहेतवे ।
शुभाशुभादिज्ञानार्थं विवक्षा वाङ्मये कृता. (ता) ॥ १० ॥

[2]ह्रस्वस्वरयुताश्चैव वर्णास्ते लघवो मताः ।
एवं दीर्घाश्च गुरवः पृष्ठस्था[3] युक्तवर्णतः ॥ ११ ॥

लघुगुर्वात्मका वर्णास्त्रिभिर्निर्मिता गणाः ।
[4]त्रिवर्णयोगप्रस्ताराद्रूपाण्यष्टौ भवन्ति हि ॥ १२ ॥

अष्टावपि गणास्ते च वाङ्मये त्रिकयोगजाः ।
एकस्मिन् त्र्यात्मके शम्भौ मूर्तयोऽष्टैव[5] जज्ञिरे ॥ १३ ॥

क्रमोत्पन्ना गणास्तेऽष्टौ न्यस्तास्तन्मूर्तिषु क्रमात् ।
तद्देवास्तु ते जातास्तन्मयत्वाच्च तत्फलाः[6] ॥ १४ ॥

किंरूपाः किमभिधानाः क्रमोत्पन्नाः कथं तु ते ।
प्रस्तारन्यासनामादि तदुत्पत्तिरथोच्यते ॥ १५ ॥

आदावीप्सितवर्णानां रूपं [7]सर्वं गुरुं न्यसेत् ।
लिखेल्लघुं मुख्यगुरोरधः शेषं तु पूर्ववत् ॥ १६ ॥

लघोरधो गुरुर्ह्रस्वो गुरोस्त्वन्यच्च पूर्ववत् ।
[8]पूर्वतुल्यानि रूपाणि स्युर्यावत् सर्वह्रस्वकम् ॥ १७ ॥

[9]प्रस्ताररूपनिर्माणकृते च सुखबोधकम् ।

---

1. H. & K.—गीतवार्ता
2. H & K—ह्रस्वा स्वरयुता.
3. P.—पृ स्था.
4. H & K—त्रिवर्णयोग.
5. H. & K—एकस्मिन्नात्मके शम्भौ मूर्तयोऽष्टौ च.
6. P.—तत्फला.
7. P.—सर्वं गुरु
8. P.—पूर्वतुल्यानि.
9. H & K—प्रस्तारं रूपनिर्माण.

सङ्ख्याङ्कित बालधिया प्रकारान्तरमुच्यते ॥ १८ ॥

[1]स्थानेद्विगुणिताद्वाद्या( ) मभिमा वर्णपङ्क्तय ।
गुरुभिर्लैस्तथैकाद्यै स्थानद्विगुणवर्द्धितै[2] ॥ १० ॥

[3]यत्त(त)म रूपमुद्दिष्ट नष्ट वा नीयते च यत ।
सङ्ख्याङ्कार्द्धे समे ह्रस्वो गुरु मकेऽर्द्ध अर्द्धभाक् ॥ २० ॥

[4]न्यस्ता सोपानवद्भण्या सैका वर्णमितकका ।
उपर्युपरि विक्षेप्या एकैक मुञ्चता मुखात् ॥ २१ ॥

सर्वगुरुरूपमाद्यमेकद्वयादि लघून्यत ।
अन्त्य च सर्वलघुक कलिते रुचिवर्णने ॥ २२ ॥

इति कलितम् ।

मयरा सतजा भो नो वणा स्युर्गणपूर्वगा ।
तत्तत्त्वमयाश्चूडामणौ हि कथिता यत ॥ २३ ॥

[5]इति सक्षेपकथनाद्गणा अष्टाप्युदीरिता ।
प्रकटा सुगमैवाक्यै कीर्त्यन्ते ते सलक्षणा[6] ॥ २४ ॥

---

1 P —स्थानद्विगुणिताद्वाद्याऽसंख्यिना वर्णपङ्क्तय ।

2 H & K —०वाद्धित ।

3 H & K add before this समस्त वाङ्मय व्याप्त त्रैलोक्यमिव विष्णुना । as 20ᵃ and take as 20ᵇ our v 23ᵃ of P But obviously this order is not correct in H verse 20ᵃ of H is not found in P
v 20 above (following P) is omitted in H The H thus reads as follows —

समस्त वान्मय व्याप्त त्रैलोक्यमिव विष्णुना ।
मयरा सतना भो ना वणा स्युगणपूर्वगा ॥ २० ॥
तत्तत्त्वमयाश्चूडामणौ हि कथिता यत ।
सवगुरुरूपमाद्यमकद्वयादिलघून्यत ।
अन्त्यतसर्वलघुक लिखिते रुचिवर्णने ॥ २१ ॥ इति कलितम् ॥

4 H — न्यस्ता सोपानवद्भण्यामैका मितैकिका ।
उपर्युपरि विक्षेप्या एकैक मुचता मुखात् ॥ २२ ॥

5 This is v 23 in H 6 P —सुलक्षणा

[1]त्रिगुरुर्मगण प्रोक्तो भूतत्त्वी तनुते श्रियम् ।
[2]लघुर्गुरू च यगणो वृद्धिकृज्जलतत्वग[3] ॥ २५ ॥

[4]गुरुर्लघुर्गुरुर्वह्ने मरण रगणोऽग्निभृत् ।
प्रवासदायी वायुस्थ सगणो लद्वय गुरु ॥ २६ ॥

खतत्त्वी शून्यफलहृत् तगणो गो गुरुर्लघु ।
[5]सूर्यदेवो रोगकारी जगणो लगुरुल्घु (लगुरुर्लघु) ॥ २७ ॥

[6]गुरुर्लघू च भगण कीर्तिकृच्चन्द्रदैवत ।
नगणस्त्रिलघुश्चाय परमात्मा सुखप्रद ॥ २८ ॥

मयौ [7]शिरस्थौ भौमाप्यौ[8] प्रान्तस्थौ[9] च गणौ भनौ[10] ।
चन्द्रात्माधिष्ठितौ नेतुर्गीतादौ ते शुभप्रदा ॥ २९ ॥

पद्ये वर्णभवे गीते ताले स्युरुपयोगिन ।
अष्टौ गणास्त्रिजास्त्वेव द्विजा आर्यादिकेष्वपि ॥ ३० ॥

वृद्धेरेकादिवर्णाना षड्विंशत्यक्षरावधि ।
एकाक्षरादि पाद स्यात्[11] पद्य भाषासु षट्स्वपि ॥ ३१ ॥

पद्येभ्योऽधिकवर्णा स्युर्दण्डका[12] बहवोऽपि ते ।
गाथेत्यनुक्त यच्छन्दोऽनदि(न्धि)च्छन्दासि पिङ्गले ॥ ३२ ॥

तालान् सोपाश्रयानुक्त्वा गणोत्पत्तिमुदीर्य च ।
स्वरादिरागभाषाणामुत्पत्तिरथ कथ्यते ॥ ३३ ॥

रागरागाङ्गभाषाङ्गक्रियाङ्गोपाङ्गभेदत ।
अखिलस्यापि नादस्य प्रकारा पञ्च कीर्तिता ॥ ३४ ॥

---

1 This is v. 24 in H
2 H—लघुर्गुरु
3 H—ज्वलत्त्वग
4 The verse is omitted in H
5 H omits 27[b] and reads 28[a] in its place
6 This is 25[b] in H
7 H—शरस्थौ
8. H—भौमाप्यौ
9 H—तानस्थौ
10 H—नभौ
11 H—पादोनात्
12 P—स्युर्दण्डिका

पञ्चस्वप्येषु चैकैक स्वरोग्रामेहि जायते ।
श्रुतिभिर्मूर्च्छनाभिश्च तत्रेरालप्तिभिस्तथा ॥ ३५ ॥

षड्जर्षभौ च गान्धारो मध्यम पञ्चमस्तथा ।
धैवतश्च निषादश्च ते स्वरा सप्त नामत ॥ ३६ ॥

कण्ठोरस्तालुरसनानासाशीर्षभिधेषु च ।
षट्सु स्थानेषु जातत्वात् षड्ज स्यात् प्रथम स्वर ॥ ३७ ॥

कण्ठात् सञ्जायते षड्ज ऋषभो हृदयोद्भव[1] ।
गान्धारस्त्वनुनासिक्यो मध्यमो नाभिसम्भव ॥ ३८ ॥

उरस शिरस कण्ठात् सञ्जात पञ्चम स्वर ।
[2]ललाटे धैवत विद्यान्निषाद सर्वसन्धिज ॥ ३९ ॥

सप्तस्वराणामुत्पत्ति शरीरे परिकीर्तिता[3] ।
नादात्मकानामेतेषा रूपवर्णादि वर्ण्यते ॥ ४० ॥

षण्मुख स्याच्चतुर्हस्त पाणिभ्यामुत्पले वहन्[4] ।
वीणाशोभिकरद्वन्द्व षड्जस्तामरसप्रभ ॥ ४१ ॥

कुल सुपर्वण जम्बूद्वीप ब्रह्मा च दैवत ।
शृङ्गारे च रसे[5] गेयोऽमुष्य गाता तु पावक[6] ॥ ४२ ॥

मयूरो वाहन त्वस्य[7] स्वरानुकरणात्पुन ।
लक्ष्म षड्जस्वरस्योक्त्वा द्वितीयस्याथ भण्यते ॥ ४३ ॥

---

1 P — हृदयाभव
2 P — ललाटे धैवत विद्यान्निषाद
3 P — परिकीर्तिता
cf with vv 37 40 the following from *Matanga*—
कण्ठादुत्तिष्ठते षड्ज ऋषभ शिरस स्थित ॥ ८५ ॥
नासाग्रायैव गान्धार उरसो मध्यम स्वर ।
उरस शिरस कण्ठादुत्थित पञ्चम स्वर ॥ ८६ ॥
ताल्वदेशात्समुत्पन्नो धैवतस्तु महामुने ।
निषादस्तु समुत्पन्नो नियत सर्वसन्धिज ॥ ८७ ॥
—बृहद्देशी स्वरनिर्णय, ८५, ८७, पृ २०
4 H & K — दधत्
5 P — शृंगारे रसे
6 H & K — गेयोऽमुष्यगाता तु पावक ।
7 H & K — तस्य

इति षड्जस्वरलक्षणम् ॥

एकवक्त्रश्चतुर्हस्तः पाणिभ्यां कमले दधत्[1] ।
वीणां बिभ्रत् कराभ्यां च ऋषभो नीलवर्णभृत् ॥ ४४ ॥

अग्निस्तु दैवतं शाकं द्वीपं गाता च पद्मभूः ।
रसो हास्योऽस्य यानं गौर्गान्धारस्याथ लक्षणम् ॥ ४५ ॥

इति ऋषभलक्षणम् ॥

गान्धारस्त्वेकवदनो गौरवर्णश्चतुष्कर ।
वीणाफलाब्जघण्टाभृत्करः स्यान्मेषवाहनः ॥ ४६ ॥

शङ्करो दैवतं क्रौञ्चो द्वीपं सुपर्वजं कुलम् ।
विष्णुर्गाता रसो वीरोऽमुष्य ज्ञेयोऽथ मध्यमः ॥ ४७ ॥

इति गान्धारलक्षणम् ॥

मध्यमश्चैकवक्त्र. स्याद्धेमवर्णश्चतुष्कर.[2] ।
सवीणाकलशौ हस्तौ सपद्मवरदौ[3] तथा ॥ ४८ ॥

भारतीदैवतं द्वीपं [4]कुशं वंशं सुपर्वजम् ।
गाता चन्द्रो रसः शान्तः क्रौञ्चो वाहनमस्य तु ॥ ४९ ॥

इति मध्यमलक्षम् ॥

पञ्चमोऽप्येकवदनो भिन्नवर्णश्च षट्कर ।
वीणाकम्बुये शङ्खाब्जे चापि वरदाभयौ ॥ ५० ॥

---

1. H. & K.—वहन.

The iconography of *svaras* given here may be compared with that given in *Brhaddesi* of *Matanga*, chp. on *svaramiraya*, p. 89 It will be seen that our text is later in as much as it gives in greater detail the different iconographic forms.

Also see *Sangitamakaranda*, p 4, VV 30 ff.

2. P—०श्चतुः करः । 3. P—स्वपद्मवरदौ.

4. H. & K.—कुरं.

स्वयम्भु(म्भू)र्दैवत[1] द्वीप शाल्मलि (श्च) नृत्शज ।
कोकिला वाहन गाता नारद प्रथमो रस ॥ ५१ ॥

इति पञ्चमलक्षणम् ॥

धैवतो गौरवर्ण स्यादेकवक्त्रश्चतुर्भुज ।
[2]वीणाकमलखट्वाङ्गफलशोभितसत्कर ॥ ५२ ॥
शम्भुस्तु देवत श्वेत द्वीप स्याद्दधिज[3] कुलम् ।
रसो भयानकश्चाश्वो यान गाता तु तुम्बरु[4] ॥ ५३ ॥

इति धैवतलक्षणम् ॥

निषादो गजवक्त्र स्याच्चित्रवर्णश्चतुर्भुज ।
त्रिशूलपद्मपरशुबीजपूरकभाकर ॥ ५४ ॥
गणेशो दैवत क्रौञ्चो द्वीप वश सुपर्वजम् ।
गाता च तुम्बरु शान्तो रस स्याद्वाहन गज ॥ ५५ ॥

इति निषादलक्षणम् ॥

स्वरेषु सप्तस्वे(स्वे)तेषु प्रत्येक ते त्रयोऽपि हि ।
मन्द्रमध्यतारसज्ञा ग्रामा स्थानस्थितिप्रदा ॥ ५६ ॥
वीणाहस्ता अमी देवा कण्ठहृन्नाभिसम्भवा ।
[5]पुरुषाङ्गनय श्वेतपीतरक्ताङ्गशोभिता ॥ ५७ ॥

इति ग्रामलक्षणम् ॥

सप्तस्वरस्थानकृत्सु स्वस्वस्थानस्थितेषु च ।
प्रत्येक मूर्च्छनैकैका ग्रामेष्वेषु प्रजायते ॥ ५८ ॥
[6]बाधा लला[7] समाधानी पूरणी चापराजिता ।
विगलिता [8]सयमिनी मद्रा च भ्रमिताक्षरा ॥ ५९ ॥

1　P—स्वयम्भुर्दैवत
2　P—वीणाकलस॰ It is difficult to say whether कमल or कमठ is the original reading
3　P—स्याद्दधिज
4　P—तुम्बुरु
5　P—पुरुषा इतय
6　P—बाधा
7　P—लला
8　P—संयमनी

[1]द्राविता मङ्गला रामा सुमङ्गल्यशेखरा ।
रमणी शोभिना नादा तथाभिचरिता[2] मता ॥ ६० ॥

नादचक्रामिका चण्डा[3] मूर्च्छना नामतस्त्वमूः ।
वीणाहस्ता इमा देव्यो लयङ्कसुखदा मता ॥ ६१ ॥

[4]प्रथमस्वरजो ग्रामो मन्द्रलङ्गा च मूर्च्छना ।
निषादे तारचण्डे च भूम्रां मर्त्यगतेन हि[5] ॥ ६२ ॥

एवं वीणादिलक्ष्याः[6] स्युर्मूर्च्छनास्त्वेकविंशति ।
भवन्त्येकोनपञ्चाशत्तानास्तांश्च भणाम्यहम् ॥ ६३ ॥

इति मूर्च्छनालक्षणम् ॥

(अथ तानाः)

[7]तत्र तेषां यदुच्यन्ते तानास्ते स्वरसंस्थिताः ।
[8]आरोहिश्रुतिसंस्थानस्थापकत्वात् एव ते ॥ ६४ ॥

ताना-नाना-नतानन्ता-[9]तत्-नेत्रक-नतरा.[10] ।
[11]विनियासे क्रमात् तानाः [12]सप्त सप्त स्वरे स्वरे ॥ ६५ ॥

---

1. H.—[illegible]. 2. P.—[illegible].
3. P.—[illegible].
The list of *mūrchanās* given here differs from other lists given in *Cūḍāmaṇi*, etc., see *Bharatakośa*, p. 501. The list also differs from *Saṅgītaratnākara*, I. 4. vv. 12 ff; *Nāṭyaśāstra*, Ch. XXVIII. vv. 30 ff., and *Saṅgītamakaranda*, p. 7; *Dattila*, p. 3, vv. 21 ff. For *mūrchanās*, esp. cf. *Bṛhaddeśī*, pp. 22 ff.
4. P.—[illegible]. 5. H. & K.—[illegible].
6. H. & K.—[illegible]. 7. H. & K.—[illegible].
8. H. & K.—[illegible]. 9. H. & K.—[illegible].
10. H. & K.—[illegible]. 11. H. & K.—[illegible].
12. H. & K.—[illegible]. Acc. to Narada there are 49 *tānas* while according to Bharata they are 84 in number, see *Bharatakośa*, pp. 244-46.

धूम्राभा कृष्णवसनान्धाली शूकरवाहना ।
द्रविडी रक्तचीरा स्याद्धेमाभा[1] मत्स्यवाहना ॥ ८१ ॥

मालवकैशिकी[2] गारा कौञ्चगा[3] रक्तचीवरा ।
रक्ताभा देवगान्धारी पीतचीराश्वयायिनी[4] ॥ ८२ ॥

श्रीरागानुगता भाषा वीणाहस्ता षडप्यमू ।
रागस्याथ वसन्तस्य रूपवर्णादि कीर्त्यते ॥ ८३ ॥

इति सभाषाश्रीरागलक्षणम् ॥

षड्वदनो दशकरो वसन्तो विद्रुमप्रभ ।
सुतालशङ्खखड्गाङ्गफलचक्राब्जभृत्कर[5] ॥ ८४ ॥

सवीणौ च करौ यस्य वरदाभयदौ तथा ।
वाहन कोकिल चैत्रे वैशाखे गीयते स च[6] ॥ ८५ ॥

[7]आन्दोला [8]कैशिकी चैव तथा प्रथममञ्जरी ।
गुण्डगिरी देवशाखा[9] रामग्री षट्(इ) वसन्तजा ॥ ८६ ॥

अथासा [10]लक्ष्म चान्दोला दोलारूढा सुवर्णभा ।
शेषा अपि च गौराङ्ग्यो दोलास्था नादपूरिता ॥ ८७ ॥

इति सभाषवसन्तलक्षणम् ॥

भैरव श्वेतवर्ण स्यादेकवक्त्रोऽष्टहस्तभाक् ।
वृषयान रुचिरामा [11]कल(काल)भैरवरूपभृत् ॥ ८८ ॥

सर्पत्रिशूलखट्वाङ्गनपमालाभिरन्वितै ।
वीणापाशकपालैश्च पाणिभिर्भूषितोऽव्ययम् ॥ ८९ ॥

---

1 H & K—रक्तधूम्राभा०
2 H & K—मालवकौशिकी
3 H & K—कावगा
4 H & K—॰श्वग मिनी ।
5 P—॰कमलाऽऽस्यभृत्कर
6 H & K—सन
7 P—अदोल
8 P—कोलकी
9 P—वैशाखा
10 P—ए आ ोल
11 P—किल

भैरवी गुर्जरी चैव भाषा वेलाकुली तथा ।
कर्णाटी रक्तहंसा च भाषा षट्(ड्) भैरवानुगा ॥ ९० ॥

नीलांशुका रक्तवर्णा भैरवी शुकवाहना ।
गौरवर्णा पीतवस्त्रा गुर्जरी मेघगामिनी ॥ ९१ ॥

श्यामाङ्गी कृष्णवसना भाषा गरुडवाहिनी ।
वेलाकुली रक्तचीरा गोरा स्याद्वृषयायिनी ॥ ९२ ॥

कर्णाटी हस्तिगमना नीलाङ्गी रक्तचीवरा ।
हंसयाना पीतवस्त्रा रक्तहंसा प्रगल्भा ॥ ९३ ॥

इति सभाषभैरवलक्षणम् ।

पञ्चमस्य च रागस्य सभाषस्याथ लक्षणम् ।
पञ्चम पञ्चवक्त्र स्याद्दशहस्तो गजेन्द्रग ॥ ९४ ॥

वीणापाशफलाङ्कुशखट्वाङ्गाब्ज(ङ्गवर)भृत्कर[1] ।
[2]तालाभयादियुक्पाणि श्यामलाङ्गश्च कीर्त्यते ॥ ९५ ॥

पञ्चमरागस्य अमू(पञ्चमस्य च रागस्यामू) षड् भाषा मतान्तरे[3] ।
त्रिगुणा स्तम्भतीर्थी स्यादाभीरी[4] ककुभा[5] तथा ।
[6]वइराडी च सामेरी षड् भाषा पञ्चमे मता ॥ ९६ ॥

---

1 P —अब्जवरभृत्कर । In H also it was originally अब्जवरभृत्कर । but either the scribe or some later reviser has corrected it

2 P —तालाभया हि०

3 From P between v 100 and v 101 where it is out of place H rightly omits this line P reads here मतान्तरे मेघरागामू षडपि भाषा ज्ञया । This does not seem to be part of a verse, even though P makes it 95a This changes the different पादाs of the following verses which is adjusted by P by making v 98 a three line verse Moreover this line of P is out of place here and could have been between v 100 and v 101 where also it seems to be out of place

4 H —स्यादाभेरी 5 P —ककुभा 6 P —वण्डराडी.

विचित्र जन्तुसद्वक्त्र तेषा देह नराकृति ।
[1]तत्तत्स्वरकृतानीणाकराख्याना( ) प्रकीर्तिता ॥ ६६ ॥

इति तानालक्षणम् ॥

अथ श्रुतय ॥

नादान्ता निष्कला गूढा सकला मधुरा तथा ।
कामाङ्गा मधुरा श्यामा तारा चन्द्रानना शुभा ॥ ६७ ॥

असम्पूर्णा वरा पूर्णा रञ्जिका वातिका[2] परा ।
[3]प्रसन्नमदना वामा बाला मधुमती तथा ॥ ६८ ॥

द्वाविंशतिश्च श्रुतय एता ज्ञेया स्वरानुगा ।
[4]श्रुतिभि कियतीभिर्स्तु युक्तास्ते च स्वरा क्रमात् ॥ ६९ ॥

चतु श्रुतिस्त्रिश्रुति स्याद्विश्रुतिश्च[5] चतु श्रुति ।
[6]त्रिश्रुतिश्चतु श्रुतिश्च द्विश्रुतिश्च स्वरा मता ॥ ७० ॥

इति श्रुतिलक्षम् ॥

श्रुतिभिर्मूर्च्छनाभिश्च ग्रामैस्तेनैश्च सहिता ।
[8]मता सप्तस्वरास्तैस्तु[9] रागभाषादय कृता ॥ ७१ ॥

(अथ रागा)

तावन्तस्ते तु रागा स्युर्यावन्त्यो जावजातय ।
षोडशसहस्रसङ्ख्यास्ते[10] रागा गोपीकृता मता ॥ ७२ ॥

1 P.—तत्तत्स्वरकृतो 2 H & K —रञ्जिका रातिका
3 H & K —प्रसन्ना वदना P —प्रसन्ना मदना
4 H & K — Omit this 69[b] and insert 70[a] below in its place For श्रुतिs see *Bharatakośa* pp 682 f 955 f *Sangitaratnakara*, 1 3 10 ff Our list differs from the lists of *Natyaśā tra*, and *Saṅg taratnākara* etc
5 P omits च 6 H & K —त्रिश्रुतिश्च चतु श्रुति
7 P —त्रिश्रुतिश्च 8. P —मता
9 H & K —,स्ते तु 10 P —तु

बुद्धिर्दारिद्र्यनस्तेऽपि न ज्ञायन्ते कथचन ।
अतोऽन्त्यबुद्धिजानार्थं तेऽधुना नियता कृता ॥ ७३ ॥

श्रीरागप्रमुखा रागा षट् षड्भाषाभिरन्विता ।
प्रत्येकं ते च विज्ञेयास्तांस्तु वक्ष्ये सलक्षणान् ॥ ७४ ॥

श्रीरागो(ऽथ) वसन्तश्च भैरव पञ्चमस्तथा ।
मेघरागश्च विज्ञेयो षष्ठो नट्टनारायण ॥ ७५ ॥'

'रूपवर्णादिर किञ्चिदमीषां प्रतिपाद्यते ।
श्रीरागोऽथ गौरवर्णो गोऽष्टरम्नश्चतुर्मुख ॥ ७६ ॥

'षाणाम्बुजस्य दुर्गासीनवृषभस्तर ।
श्रीणा पञ्चपेऽस्य' स्यादेकश्च वाद्य पर ॥ ७७ ॥

विम्ब्यानोऽस्य हयवानो नक्षत्रचरितापर' ।
'एतत्त्वनुभाषाणां नामानि स्युर्यथाक्रमम् ॥ ७८ ॥

गौडी कोलाहलान्धारी' द्राविडी मालवकैशिकी' ।
षष्ठी स्याद्देवगान्धारी तासां वर्ण्यादि (वर्णादि) वर्ण्यते ॥ ७९ ॥

गौडी भाषा धनश्यामा गौराङ्गी गजगाहना ।
कोलाहला रक्तवर्णा गौरा तु शुक्लाहना ॥ ८० ॥

त्रिगुणा महिपयाना च[1] श्यामला कृष्णचीवरा ।
स्तम्भतीर्थी पीतवस्त्रा रक्ताङ्गा सर्पवाहना ॥ ९७ ॥

नीलाम्बरा च गोरा स्यादाभीरी[2] केकिगामिनी ।
ककुभा रक्तसिचया रक्ताङ्गी वस्त्रवाहना ॥ ९८ ॥

[3]वईराडी भिन्नवणा च कृष्णवस्त्रोष्ट्रयायिनी ।
श्वेतवर्णा नीलवस्त्रा सामेरी स्यान्मृगासना ॥ ९९ ॥

सभापपञ्चमरागलक्षणम् ॥

अथ मेघाभिधो राग एकवक्त्रोऽष्टपाणिभृत् ।
मेघवर्णः केकिगामी पीताम्बरधरोऽपि च ॥ १०० ॥

शङ्खचक्रगदावीणापद्माभयवरासिभृत् ।
करोच्चयो यस्य सभा तस्य भाषा षडप्यथ ॥ १०१ ॥

[4]वङ्गाला मधुरा चेव कामोदा चोक्ष(चाक्ष)साटिका ।
देवगिरी च देवाला तासां लक्षणमुच्यते ॥ १०२ ॥

वङ्गाला पीतवसना गौराङ्गी खड्गगामिनी ।
पीतवस्त्रा च नीलाङ्गी[5] मधुरा सारसासना[6] ॥ १०३ ॥

नीलाम्बरा गौरदेहा कामोदा क्रोञ्चगामिनी ।
गौराङ्गी पीतवसना हसगा चाक्षसाटिका[7] ॥ १०४ ॥

---

1 P omits च   2 H — स्यादाभरी
3 P — च मेराडा
4 P adds before this पञ्चमरागस्य अमू पञ्च भाषा मतान्तरे । which is out of place here and should rather have been after v 95 where P reads मतान्तर मघरागाम् (गाऽम्) पडपि ज्ञेया । which *again should have been here* But both may be interpolations as मतान्तरs do not follow in succeeding verses
5 H — नीलाङ्गा
6 P — रा सारना । H — सारसवाहना
7 P — चाक्षमाटिका   H — चाक्षसाटका

[1]तार्क्ष्यासना देवगिरी मेघाभा रक्तचीवरा ।
मयूरवाहना श्यामा देवाला नीलचीवरा ॥ १०५ ॥

इति मभापमेघरागलक्षणम् ।

नट्टनारायणो रागो नीलवर्णश्चतुर्भुज ।
शङ्खचक्रगदावीणाकर[2] स्याद्गरुडासन[3] ॥ १०६ ॥
तोटिका मोटिका चैव नट्टा कुम्भी तथैव च ।
मल्ला(ल्हा)री[4] सिन्धुमल्हारी[5] नट्टनारायणाश्रया ॥ १०७ ॥
अथासा लक्षण रक्ता तोटिका सम्बरासना ।
मोटिका नीलवसना गोरा[6] कुर्कुर(कुट)वाहना ॥ १०८ ॥
नट्टा क्रौञ्चासना पीतचीवरा मेघदेहभा ।
हेमवर्णा रक्तचीरा कुम्भी स्यात्खरवाहिनी ॥ १०९ ॥
नीलाभा रक्तवसना मल्लारी(ल्हारी) च कपोतगा[7] ।
सिन्धुमल्ला(ल्हा)रिका गोरा पीतचीरा गजासना ॥ ११० ॥
वीणाहस्ता नादरूपा भाषा[8] षट्त्रिंशदात्मगा ।
रागभाषे त(षास्त)थोक्त्वाथ रागाङ्गादिरुच्यते ॥ १११ ॥

इति मभापनट्टनारायणलक्षणम् ॥

देवशाख्या मालवश्रीर्धनश्रीर्दीपकादय ।
स्वचतुर्ज्जातिसयुक्ता रागाङ्गा( ) कथिता अमी ॥ ११२ ॥

इति रागाङ्गाः ॥

बृहती पुलिन्द्रिका[9] चैव सन्धिरी ललितादय ।
भाषाङ्गा विविधा भीमपलासीप्रमुखा अपि ॥ ११३ ॥

इति भाषाङ्गाः ॥

---

1 H —तार्क्षमना 2 H —वीराम्बर
3 P —स्याद्गरुपन
4 H reads गांधारा which however is corrected as मल्हारी in margin
5 P —सिन्धुमगारी 6 H —गौरी.
7 P.—च पोतगा 8 P —भाषा 9 H & K —पुलिन्द्रिका

वैराटिका वृद्धहसा तथा सौराष्ट्रिकादय ।
[1]शोक शकादयश्चान्ये क्रियाङ्गेषु प्रकीर्तिता ॥ ११४ ॥

इति क्रियाङ्गानि ॥

[2]केदारवर्णस्थानाख्यास्तथा मालविकादय ।
कर्णाटबङ्गालमुख्या सर्वे गौडा उपाङ्गगा ॥ ११५ ॥

इत्युपाङ्गानि ॥

ज्ञेया [3]रागेषु रागाङ्गा क्रियाङ्गोपाङ्गकावपि[4] ।
तथा भाषासु भाषाङ्गा[5] स्वस्वदेशभवा[6] अपि ॥ ११६ ॥

रागाश्चतुर्विधा देश्यशुद्धसालिगछाइला[7] ।
ओडव षाडव पूर्णोऽपूर्णोप्येति[8] चतुर्विधा ॥ ११७ ॥

नृसञ्ज्ञिता मता देवा देव्यश्च महिलाभिधा ।
वीणाहस्ता नादरूपा सर्वे ज्ञेया अमी बुधै ॥ ११८ ॥

इति रागरागाङ्गक्रियाङ्गोपाङ्गभाषाभाषाङ्गलक्षणम् ॥

रचितास्ते त्वलङ्कारा सप्तस्वरमुखाक्षरै ।
एषु सर्वेषु रागेषु स्वराणा कारण हि तत् ॥ ११९ ॥

[9]अन्योन्यस्वरवर्णाना सान्ताना तु प्रयोगत ।
ये जायन्ते वर्णगुम्फास्तेऽलङ्कारा[10] प्रकीर्तिता ॥ १२० ॥

तेऽलङ्कारा द्वादशैवमाद्या शिवमते मता ।
साद्या अष्टादशमतास्ते तु गौरीमते तथा ॥ १२१ ॥[11]

---

1 P — शोकप्रकाशकाश्चाय
2 P — केदारवर्णौ॰
3 P — रागेषु
4 H & K — क्रियाङ्गोपाङ्गगावपि
5 P — भाषाङ्गा
6 P — स्वस्वदेवभवा.
7 H & K — ॰छायला
8 P — पूर्णाऽपूर्णोऽप्येति.
9 P — अन्योन्य
10 H & K — ॰स्ते त्वलङ्कारा.
11 For a different view see *Sangītasamayasāra* of Pārśvadeva I 44 ff p 4

अष्टादशान्तर्लीनास्तु द्वादशैते शिवोद्भवाः ।
अतो गौरीमतोद्भूतॉस्तानेवाष्टदश ब्रुवे ॥ १२२ ॥
प्रसन्नश्च परावृत्तो निवृत्तः[1] परिवर्तक ।
आक्षिप्त सम्प्रदानश्चोद्वाहश्चोपलोलकः ॥ १२३ ॥
त्रामको (क्रमको) बहुमानश्च घातको मलिनस्तथा ।
हुङ्कारोद्योतवियोता सुवाहुप्रौढमन्मुखा ॥ १२४ ॥
अष्टादशेत्यलङ्कारा नामत कथिता अमी ।
[2]क्रमव्य(व्यु)त्क्रमविन्यस्ताष्टवर्णानां क्रमो ह्यथ ॥ १२५ ॥

मारीगमपधनीसा ॥ प्रसन्नः ॥ १ ॥

सानीधपमगरीसा ॥ परावृत्त ॥ २ ॥

[3]सारी (।) सारीग (।) सारीगम (।) सारीगमप [सारीगमपध]
सारीगमपधनी (।) सारीगमपधनीसा ॥ निवृत्तः ॥ ३ ॥

[4]सानीसा (।) नीधसा (।) नीधपसा (।) नीधपमसा (।) नीधपमगसा (।)
नीधपमगरीसा (।) नीधपमगरीसा ॥ परिवर्त्तक ॥ ४ ॥

गीसा (।) गरीसा (।) मगरीसा (।) पमगरीसा[5] (।) धपमगरीसा (।)
नीधपमगरीसा (।) सानीधपमगरीसा ॥ आक्षिप्त[6] ॥ ५ ॥

[7]सानी (।) सानीध (।) सानी सानीधप (।) सानीधपम (।)
सानीधपमग (।) सानीधपमगरी (।) सानीधपमगरीसा (।)
सम्प्रदान ॥ ६ ॥

---

1. P.—निवृत्त . H.—निवर्त.
2. H. & K.—क्रमविन्यस्त॰ Cf. with the alamkāras treated here, the section on alamkāras in Sangitaratnākara, 1. 6
3. H. & K.—सारि॰ व सारिगम सारिगमपध सारिगम प सारिगमपधनी सारिगमप- नीसारि ॥ निवृत्त ॥ ३ ॥
4. H. & K.—सनीसा नीधसा नीधपसा [illegible] [illegible] [illegible] सारि- गमपधनी सनीसा (॥) परिवर्तक ॥ ४ ॥
5. Omitted by P. 6. H & K—आक्षिप्त ॥
7. P.—सानी सानी सानीधप सानीधपम सानी धपमग सानीधपमगरी सानीधपमगरीसा । सम्प्रदान ॥ ६

[1]रीसा । गरी । मग । पम । धप । नीध । सानी । उद्ग्राह ॥ ७ ॥

[2]सानी । नीध । धप । पम । मग । गरी । रीसा । उपलोल्क ॥ ८ ॥

[3]सारी । रीग । गम । मप । पध । धनी । नीसा । क्रामक ॥ ९ ॥

[4]सानी । नीध । धप । पम । मग । गरी । रीसा । बहुमान ॥ १० ॥

[5]साग । सारी[6] । रीम । गप । मध । पनी । सनीमा(धसा)[7] ।
घातक ॥ ११ ॥

[8]सानी । साध । नीप । धम । पग । मरी । गसारीसा (गसा । रीसा)
मल्लिन ॥ १२ ॥

सारीगम मगरीसा । सानधिप पधनीसा । हुकार ॥ १३ ॥

[9]सासा । रीनी । गध । मप । पम । धग । नीरीसासा ।
(नीरी । सासा) । उद्योत ॥ १४ ॥

[10]सामपसा (।) सारीग (।) धनीसा (।) सानीध (।) गरीसा ।
सापमसा । विद्योत ॥ १५ ॥

[11]सारीसा सामसा । मामनीसा । साधपसा[12] । सुबाहु ॥ १६ ॥

---

1 P does not give the danda marks.

2 P—सामानी । नीनी धधध पपप ममम गगग रीरीरीसा । उपलोल्क ॥ ८ ॥

3 P does not give the danda marks

4 P—सानी नीधधपपममगगरारीसा । बहुमान ॥ १० ॥
H reads मप for पम

5 P does not give danda marks

6 सारी is here not necessary but both P and H read it

7 P reads सा for सनीमा

8 P omits daṇda marks

9 P omits danda marks, and reads उद्योतक for उद्योत
H reads सासारी ॥ नी । गध । etc which seems to be a scribal error for the text given above

10 H—reads सामसा । सारीग । etc P omits daṇda marks

11 P—सारीसा सामसा मामनीसा साधपसा । etc

12 H reads सापमसा for साधपसा

[1]मपगध । रीनीसासा । सासानीरी । धगमप । प्रौढः ॥ १७ ॥

[2]सागपनीमा । सारीमधसा । साप (।) रीध (।) गनी (।)
मसा (।) सरिगरीसा । गमपमगा । पधनीधपा ।
सानीधनीसा । धपमपधा । मगरीगमा । साम । रीप ।
गध । मनी (।) पसा । साप (।) नीम (।) धग (।) परी (।)
मसा । इति सन्मुखः ॥ १८ ॥

एवमलङ्कारा ज्ञेया ॥ १८ ॥

१ २ ३ ४ ५ ६ ७ ८ मा री ग म प ध नी मा सूचिकावत् सूक्ष्म स्वर आद्य प्रौढ. प्रान्तेश्चेति प्रसन्न. । १	८ ७ ६ ५ ४ ३ २ १ सा नी ध प म ग री मा सर्पकाय इव पतन् स्वर इति परावृत. । २
१ २ ३ ४ ५ ६ ७ ८ सा री ग म प ध नी सा बालचन्द्रवत् क्रमेण स्वरै- र्वर्द्धित इति निवृत्त. । ३	८ ७ ६ ५ ४ ३ २ १ सा ना ध प म ग री सा घण्टानादवत् पूर्वोक्तस्वरा ह्रीयन्ते इति परावर्तक । ४
१ २ ३ ४ ५ ६ ७ ८ सा रीं ग म प ध नीं सा गोवत्सवदग्रे गत्वा गामेवाभ्येति इति आक्षिप्तः । ५	व्युत्क्रमस्वरा विजयिनृपवत्स्वस्थानस्थः पृष्ठस्थान्देशान्मन्दं२ सर्वान्भुनक्ति (इति) सम्प्रदानः । ६
क्रमस्वरा मुवशवत्परः परेण प्रकाश्यते इति उद्वाहः । ७	व्युत्क्रमस्वराः पूर्वजवत् वृद्धान्२ प्रकाशयन्ते (इति) उपलोलक । ८
क्रमस्वराः पितृपुत्रवत् पितु पुत्र स एव पिता तस्यान्य- पुत्र इति क्रामक । ९	व्युत्क्रमस्वराः राज्यक्रमवत् पूर्वपूर्वराज्यं गृह्णाति इति बहुमान । १०

1. P. omits danda marks and reads धगम for धगमप.
2. According to H.
   P.—सागनीसा । सारीमधसा । सापरीध । गनीमसा । सरिगरीसा । गमपमगा । पधनीधपा । सानीधनिसा । धपमपधा । मगरिगमा । मामरीपगधमनी । पसामाप । नीम । धगपरीमसा । इति समुखः ॥ १८ ॥

क्रमस्वरा जालिकावत्
इति धातकः । ११



व्युत्क्रमस्वरा विपरीत-
-जालिकावत् इति
मलिनः । १२
××××××××

सारीगम पधनीसा

वज्रवत् त्रिवलिवत् हुंकारः। १३

सा री ग म प धनीसा

शंङ्खवद् द्विधा उद्योतः
१४

सा री ग मप धनी सा

नाडी सर्पवद् विद्योतः।१५

सारी गम पध नी सा

महानाडीवत् सुबाहुः।१६

सारीगमपधनीसा

छत्रवत् प्रौढः।१७

षडीस्वली
सा सा री नी ग ध म प

सन्मुखः। १८

अष्टकोणं
सा सा री नी ग ध म प

विचित्रबन्धः।

सा सा री नी ग ध म प

कमलं।

सा री ग म प ध नी सा

हारगुम्फ इत्यादयः
एवं अलङ्कारा नानावि-
-धा ज्ञेयाः।

छत्रचक्रासिशङ्खाब्जजालीगोमूत्रिकादय ।
[1]स्युर्विचित्राणि चित्राणि बुद्धया कार्या तदाकृति ॥ १२६ ॥

[2]क्रमव्युत्क्रमविन्यासादन्योन्य स्वरयोगत ।
जायन्ते बहवो भेदास्तेऽस्मिन्नष्टादश[3] स्मृता ॥ १२७ ॥

एवमष्टादश प्रोक्ता अलङ्कारा स्वरानुगा ।
न्यस्ता अमी प्रबन्धस्थकरणे[4] स्वरपूर्वके ॥ १२८ ॥

पाटाना करणे चेयमेव[5] रीतिर्मता हिता ।
[6]अष्टमाद्योत्थपाटाना योगात्तत्स्वरवद्भवेत् ॥ १२९ ॥

अष्टो ते मृतला(मुङ्गला)वशो[7] वीणापट्टाउजो तथा ।
[8]मृदङ्गतवि(त्रिव)ली तालकांस्यतालो स्वभेदिनौ ॥ १३० ॥

इत्यलङ्कारस्वरकरणपाटकरणानां लक्षणम् ॥

स्वरकरणसुदक्ष पाटबन्धैकधुर्य
स्वरनियमितरागप्रोढभेदप्रवीण ।
सरसवचनगुम्फो गीतनिर्माणदक्ष
स हि भवति यशस्वी सर्वराजा सदस्सु ॥ १३१ ॥

इति श्रीमलधारि(गच्छमण्डन)श्रीराजशेखरसूरिशिष्यवाचनाचार्यश्रीसुधाकलशविरचिते स्वोपज्ञ-सङ्गीतोपनिषद्ग्रन्थसारोद्धारे गणस्वररागादिप्रकाशनो नाम तृतीयोऽध्याय ॥ ३ ॥ छ ॥

---

1 H & K —सवाचनाणि विमाणि बुद्धया गार्या तदाकृति ॥
2 H & K —क्रमविक्रमावेनामादयाय०
3 P —०ष्टादशो स्मृता । H in margin आम्नत्—प्रथ
4 H & K —प्रबन्धास्ते करणे
5 H & K —चैवयामव
6 H & K —अष्टाद्यादिपाटाना
7. P —अष्टौ त भुगलावशौ H — अष्ट ते०
8 P —मृदंगानित्रलीनाल०

चतुर्थोऽध्यायः ।

सरभसमिलिताना नाकलोकाङ्गनाना
[1]ततघनशु(सु)षिरास्यानद्धवाद्यैश्च नृत्ये ।
[2]त्रिभुवनवनिताया सोऽयमुक्तच [3]स्वराण्या
समवसरणभूमौ वीतरागो मुदे स ॥ १ ॥

अथ वाद्यानि कथ्यन्ते [4]बन्धा वर्णाश्च तद्भवा ।
वाद्यानीह चतुर्धा [5] स्युस्तज्ज्ञा वर्णास्त्वनेकधा ॥ २ ॥

तत वीणादिक वाद्य तालप्रभृतिक घन ।
वशादिक तु शु(सु)षिरमानद्ध मुरजादिकम् ॥ ३ ॥

केचिदूचुस्त्रिधा वाद्यमङ्क्यालिङ्ग्यूर्ध्वग त्विति ।
पुष्कापुटतालगात्रयन्त्राणीति तु पञ्चधा ॥ ४ ॥

---

1 P —ततघनसुषिरानद्ध०
2 H —त्रिभुवनवनिताया
3 H —सुवाण्या
4 P —बन्धाद्वर्णाश्च
5 Cf —

पञ्चधा च चतुर्धा च त्रिविध च मत मते ।
काहलस्य मत स्यात पञ्चधा वाद्यमेव च ॥
सुषिर च घन चैव चमनद्ध तथैव च ।
तन्त्रीगान पुरा स्यान पञ्चधा वाद्यलक्षणम् ॥

चतुर्विध दात्तलेन—
आनद्ध ततमव स्यात् घन च सुषिर तथा ।
एव चतुर्विध वाद्य दात्तलेन प्रकीर्तितम् ॥

नारदमते तु चामण तान्तक चैव घन च त्रिविध मतम् ।
एव त्रिधा नारदस्य मत वाद्यस्य लक्षणम् ॥

Ibid quoted in *Bharatakośa* p 599
According to Bharata *vādya* is fourfold

आहतोऽनाहतश्चैव दण्डाहतकराहतौ ।
वाताहतश्चेत्यथवा पञ्चशब्दा[1] उदीरिता ॥ ५ ॥

तते वीणादिके वीणा पिनाकीकिन्नरीमुखा ।
पिनाकी सधनुस्तुम्बा किन्नर्यो द्वित्रितुम्बिका ॥ ६ ॥

वीणास्तु [2]देववीणाद्यास्तास्त्विमा नादपूरिता ।
शिवस्य [3]वीणानाम्नी सरस्वत्यास्तु कच्छपी ॥ ७ ॥

विश्वावसोस्तु बृहती महती नारदस्य च[4] ।
कलावती तुम्बरोस्तु गणाना च प्रभावती ॥ ८ ॥

तथा घोषवती वीणा विपञ्ची कण्ठकूणिका ।
वल्लकी ब्रह्मवीणेति वीणाभेदास्त्वनेकश ॥ ९ ॥

वीणास्त्वेकतन्त्र्याद्यास्तन्त्रीसङ्ख्याङ्किताभिधा ।
एकविंशतितन्त्र्यन्ता मानव्यो देवता अपि ॥ १० ॥

एकतन्त्री द्वितन्त्री च त्रितन्त्री सप्ततन्त्रिका ।
एकविंशतितन्त्री चेत्युत्तमा मध्यमापरा ॥ ११ ॥

भजते सर्ववीणासु [5]सैकतन्त्री प्रधानताम् ।
ब्रह्महत्या हरत्येषा दर्शनात् स्पर्शनादपि ॥ १२ ॥

दण्ड शिव शिवा तन्त्री नाभिभूनाभिरुच्यते ।
तुम्ब विष्णु कला ब्राह्मी वासुकिर्दोरकस्मृत ॥ १३ ॥

---

1 Cf --अनाहत आहतश्चेति स नादो द्विविधो मत ।

× × × ×

सोऽप्याहत पञ्चविधो नादस्तु परिकीर्तित ।
नखवायुजचर्मण्यगेहशारीरजास्तथा ॥ ७ ॥

—सङ्गीतमकरन्द, १ ४ ७, पृ १ २

2 P —देववाद्यास्तास्त्विमा *Bharatakosa*, p 629 reads—वीणासु देववीणाद्या विज्ञेया नादपूरिता । For different lists of वीणाs see Bharata kosa, pp 628 29

3 P —वीण नाम्नी वीणाऽनाम्नी acc. to *Bharatakosa*, p 629

4 P —इ

5 P —चैकतन्त्री प्रधानताम् ।

स्वरान्ग्रामान्मूर्छनाश्च तालल्सिश्रुनीम्नथा ।
मसाध्य तस्या रागान्तु सर्वे वाद्या( ) सुबुद्धिभि ॥ १४ ॥

स्वरसाधनसम्यानन्दिमसकण्डया ।
वीणया निर्मिताभ्यासो नाद शुद्धिकर पर[1] ॥ १५ ॥

गुरूपदेशादन्येऽपि भेदा वाद्याश्च कौतुकात् ।
सक्षेपान्नाममात्रेण वक्ष्ये भेदान्तु कस्यपि ॥ १६ ॥

[2]कत्रवाडो [3]वृटवाडञ्छन्दो धारा च [4]कुदी[4] ।
कड्कारो हाक[5] हुकेति तिरिपो[6] वदणिर्वलि[7] ॥ १७ ॥

वयणि कोमलिर्म्तापिश्चोपिर्भरितपृरितौ ।
[8]ओहर [9]प्रसरश्चाण प्राणाद्या[10] वैणिका मता ॥ १८ ॥

घात पातश्च सलेग्वो लेग्वोलेग्वा च लेग्वका ।
घोषोऽ[11]ढकरर्वरी रेफो भेदा एव घना मता ॥ १९ ॥

आलक्षयोऽप्यथ ज्ञेया व्यक्ताव्यक्तात्मकाकुरा ।
परकाद्दुर्देशकाद्रु( ) शुद्धा सालङ्कृता तथा ॥ २० ॥

Also see *Vinalakṣana and Vinaprapathaka* (GOS No 131) for वीणाs

1 P omits this verse

2 H & K —कतवाडो *Bharatakośa* (quoting our vv 17-18, under वीणाभ्राणा, on p 628)—कत्रवाड P —कत्रवाडा

3 P —वोटवार *Bharatakośa*,—वुटवाड

4 P —कैकुरी H —कैकुरी *Bharatakośa*—कौहुरी

5 H & K —कवाले हाँप P —कवारो हा(प) *Bharatakośa*—कड्कारो हाकहुकेति

6 H & K —तरिपा P —तिरिपा *Bharatakośa*—तिरपो

7 P —चद्दणिर्वलि H & K —वद्दणिवलि *Bharatakośa*—वद्दणिवलि .

8 H & K —आहर P —उहर (or आहर indistinct) Bharatakośa—हुहर

9 P H & K प्रसर *Bharatakośa*—प्रहर

10 P —प्राया

11 H —,घोर्डकरी•

वाद्यानि सुषिरे चाथ वंशशङ्खश्च मुरली ।
भेरी शृङ्गं वसुली च मुखवाद्यान्यनेकश ॥ २९ ॥[1]

वैणव खादिरो दान्तश्चान्दनो रक्तचन्दन[2] ।
आयस कांस्यजस्तारो भवेद्दण्डश्च हैमन ॥ ३० ॥

खादिरो वर्तुल श्लक्ष्णो ग्रन्थिभेदव्रणोज्झित ।
कनिष्ठाङ्गुलिनिस्तार [3]गर्भेऽस्य सुषिर मतम् ॥ ३१ ॥

त्यक्त्वा च तत्र दण्डे त्रीण्यङ्गुलानि शिरःस्थलात् ।
मुक्तासूत्र(कृत्वा पृ न्ना)रसुषिर कार्यमङ्गुलिसम्मितम् ॥ ३२ ॥

द्विहस्ताङ्गुलिसाध्यानि दण्डप्रान्ते द्वितीयके ।
एकाङ्गुलान्तराणि स्युश्छिद्राण्यन्यानि सप्त च ॥ ३३ ॥

[4]तान्यधो बदरीबीजसदृशानि भवन्ति हि ।
नादहेतोर्मारुतस्य निर्गमाय कृतानि तु ॥ ३४ ॥

भवन्ति मुखरन्ध्रस्यताररन्ध्रस्य चान्तरे ।
[5]एकैकाङ्गुलिवृद्धा स्युर्वंशाश्च द्वादश क्रमात् ॥ ३५ ॥

[6]द्वात्रिंशत्यङ्गुलमित वंश यावद्भवन्त्यमी ।
अविस्पष्टश्रुतित्वाच्चे वंशा नोक्तास्तु नीरसा ॥ ३६ ॥

---

1 For सुषिरवाद्य according to various texts, see, *Bharatakośa*, p 734

2 P —रक्तचन्दन For वंश and its varieties according to Kumbha and others see, *Bharatakośa*, pp 576 77, pp 934 ff

3 P omits from here upto v 32d and कार्यमङ्गुलिसम्मितम् is read in 31d in P

4 P —तान्यधो बदरीबी० H & K —तानितो बदिरीबी०

5 H & K —एकैकाङ्गुलिवृद्धा P —एकैकाङ्गुलवृद्धा

6 Acc to Someśvara (quoted in *Bharatakośa*, p 577) the maximum length is 18 angulas

जयो नवाङ्गुलो ज्ञेयो विजयो द्वादशाङ्गुल ।
त्रयोदशाङ्गुलो नन्दो महानन्दश्चतुर्दश ॥ ३७ ॥
अमी [1]प्रशस्ताश्चत्वार सरन्ध्रा सरसा इति ।
पुरुषश्चतस्र एतेषा तासा सज्ञा( ) क्रमादम् [2] ॥ ३८ ॥
इरला निरला चैव पोरा प्रौढा च नामत ।
इरला सूक्ष्मनादा स्यान्निरला [3]द्योतिरन्विता ॥ ३९ ॥
पोरा तु काहलानादा प्रौढा रङ्गविनाशिनी ।
घनत्व [4]सुस्वरत्व च पूरत्व फूत्कृतेर्गुणा ॥ ४० ॥

इति सुषिरे वंशलक्षणम् ॥

अभग्न शङ्खमुत्ताननाभिक[5] सागरोद्भवम् ।
एकाङ्गुल तस्य मुखे रन्ध्र शब्दस्य[6] कारकम् ॥ ४१ ॥

इति शङ्खलक्षणम् ॥

भुङ्गला ताम्रघटिता गोपुच्छाकारधारिणी ।
प्रलम्बमाहुदण्डाङ्गी[7] वाद्या मङ्गलकर्मसु ॥ ४२ ॥

इति भुङ्गलालक्षणम् ॥

नृपवाद्य भवेद्भेरी भद्रा कालनिवेदिनी ।
धत्तूरकुसुमाकाराऽखण्डा प्रौढनिनादिनी ॥ ४३ ॥

इति भेरीलक्षणम् ॥[8]

महिषशृङ्गज शृङ्ग वक्राकार च[9] तत्तनु ।

---

1 P —प्रशस्या० 2 P —क्रमादथ
3 P —स्यानिरान्वता H & K —ज्यानिराङ्वता
4 H & K —सुस्वरत्व च
5 H & K —मरसमुत्तानं सुनाभि For remarks of Somesvara Kumbha and Nanya on Sankha see *Bharatakosa* p 654
6 H & K —शब्दस्य
7 H & K —बाहुदण्डाङ्गी भुङ्गल is भूंगळ in Gujarati
8 For भेरी, see also, *Bharatakosa*, p 443 and p 902
9 P —वक्राकार पतत्तनु । H —वक्राकार च तत्तनु ।

श्याम सूक्ष्माग्रवदन गोपनाद्य त्रुटत्स्वरम् ॥ ४४ ॥

इति शृङ्गलक्षणम् ।

वंशवद्वंसुली ज्ञेया वंशखण्डा[1] समाङ्गभृत् ।
गोपप्रियानेकविधा वाद्या [2]साऽहिधृतामपि ॥ ४५ ॥

इति वंसुलीलक्षणम् ।

काहला श्वापच वाद्य तुररीय तु नादगम् ।
रणवाद्य मधुकरी [3]चान्यत्न सुषिर विदु ॥ ४६ ॥

इति सुषिरवाद्यलक्षणम् ।

[4]मुरजादिपदानद्ध [5]तद्वाद्यमथ वच्म्यह ।
[6]मृदङ्गढक्कानिस्साण त्रिवलीपटहादिकम् ॥ ४७ ॥

[7]मुरजस्तु मते जैने जात शङ्खान्महानिधे ।
लोके तु स्वयमीशेन स वाद्यो मुरज कृत ॥ ४८ ॥

कथं रुद्रेण तद्वाद्य मुरजाख्य विनिर्मित ।
कथ पाटभवा वर्णा न्यस्तास्तस्मिँश्च वन्धिनि ॥ ४९ ॥

[8]कैलासाद्रौ स्थित रुद्रमन्यदा ध्यानतत्परम् ।
ज्ञात्वा स्वघातकमिति तत्रागान्मुरजासुर ॥ ५० ॥

प्राप्तब्रह्मवर मा तु न हन्तु कोऽप्यल पर[9] ।
ऋते हरात्तपोयुक्तादतस्त पातयाम्यत ॥ ५१ ॥

---

1 P —वंशसङ्ग्समागभृत् । H —वंशदण्डा
2 P —साहिमतामपि ॥ ४५ ॥ इति वंसुलक्षणम् ।
3 P —मधुकरी चास्यत　4 H.—मरजादि०
5 P —तद्वाक्यमवच्म्यह ।
6 H —मृदङ्गढक्कानि स्थानत्रिवलीपटहादिकम् ॥
P —मृदङ्गढक्कान स्वार्गत्रिवलीपटहादिकम् ॥
7 H —मरजस्तु　8 H —कैलाशाद्रौ
9 P —कोऽप्यलं पुर ।

विमृश्यैवं तपोविघ्नरूपं निर्मापयन्मधुं[1] ।
तत्र कैलासशिखरे वने बहुतरौ च सः ॥ ५२ ॥
ध्यानं विसृज्य रुद्रोऽपि पश्यति स्म तपोवनम् ।
तपोलोपि च तज्ज्ञात्वा तत्कृतं ज्ञानचक्षुषा ॥ ५३ ॥
तपोलोपिनि तस्मिंस्तु कुपितो निर्ययौ ततः ।
रुद्रो रुद्रमनास्तं च दृष्ट्वा प्रोवाच राक्षसम् ॥ ५४ ॥
तपोभङ्गोद्यमं कृत्वा रे रे रक्ष क यास्यतः ।
प्रजल्पित्युक्त एवायं युयुत्सुर्हरमापतत् ॥ ५५ ॥
[2]स चिरं योधयित्वा तं पशुमारममारयत् ।
कण्ठपार्श्वास्थि(स्थ्यङ्घ्रि)हीनं तद्देहं कृत्वात्यजद्भुवि ॥ ५६ ॥
शिवे स्वस्थानमायाते सार्द्रं तद्देहपञ्जरम् ।
उत्पाट्य मांसलोभेन गृध्रैर्नीतं नभस्तले ॥ ५७ ॥
मांसं तत्पञ्जरस्थं तैः किञ्चिद्भुक्त्वाऽतिभारतः ।
[3]पातिते स्वमुखेभ्यस्तत्सान्त्रं[4] वृक्षोपरि स्थितम् ॥ ५८ ॥
अन्त्रावलीभिः संलग्नं तरुशाखावलम्बि तत्[5] ।
सूर्यातपेन [6]संशुष्कं चर्मनद्धं मुखद्वये[7] ॥ ५९ ॥
निर्मांसत्वाच्चदन्तस्तु सुषिरं वायुयोगतः ।
शब्दायमानं [8]श्रीकण्ठः मु(शु)श्रावाथ वने[9] भ्रमन् ॥ ६० ॥
तच्छब्दितं समाकर्ण्य श्रुतिसौख्यकरं परं ।
पांसुकाद्यत्र गवेशन्स ददर्श तथा स्थितम् ॥ ६१ ॥
किमेतदिति तद्रूपं पश्यन्नस्मार तं शिरः ।
विचिन्त्य स्वहतं पूर्वं वामहस्तेन चाग्रहीत् ॥ ६२ ॥

---

1. P.—मधु ।
2. H.—सुचिरं योधयित्वा
3. P.—पतिते.
4. H.—त्सं शुष्कं.
5. P.—तरुशाखावलिम्ब तत् ।
6. P.—संशुष्कं.
7. P.—मुखद्वये ।
8. P.—श्रीकण्ठ.
9. P.—वनं.

विशेपशब्द उत्पेदे ता इत्यसिन्सनादके[1] ।
नौतुकाद्दक्षिणेनापि करेण प्रहत तत[2] ॥ ६३ ॥

उत्पन्नो धीत्यय शब्दस्त जघान पुन शिर ।
करेण वामेन परो जजृम्भे [3]थों इति स्फुटम् ॥ ६४ ॥

दक्षिणेन करेणापि मुरजाच्च पुनर्हतात् ।
जज्ञे द्रेमित्यय शब्द स चाथ[4] स्वाश्रय ययो ॥ ६५ ॥

कियत्यपि गते काले [5]प्रावृडर्त्तो(ड्तो) समेऽन्तरि[6] ।
विजह्र शम्भुरुमया ननोटजकृते तदा ॥ ६६ ॥

[7]पलाशसर्ग(र्ज)पत्राणा शाड्वलाना निवेशनात् ।
गणेभ्य कारयामास [8]शर्वस्तत्रोटज नवम् ॥ ६७ ॥

एकदोटजपत्रेषु शुष्केषु परिपातितान् ।
नवाब्जेनाम्बुनिन्दृम्तु[9] शुश्रावोमायुतो हर ॥ ६८ ॥

उक्त च शिवया स्वामिन्पत्रेप्वासारयोगत ।
सञ्जाता यादृशा शब्दास्तादृशान्स्थापय क्वचित् ॥ ६९ ॥[10]

इत्युक्ते विमृशन्नीश स्मृत्वा मुरजमोमिति ।
ऊचे च[11] पूर्ववृत्तान्त तच्छब्दांस्तत्र च न्यधात् ॥ ७० ॥

ते शब्दा कीदृशास्तत्र कथ न्यस्तास्तु मर्दले[12] ।
तत्प्रसङ्गेन तत्पाणौ[13] उत्पन्ना कीदृशास्त्विति ॥ ७१ ॥

---

1 P —ते इत्यासम'ममादक 2 P —प्रहतात्तन ।
3 P —था
4 H —चाप्य Cf पुरा मुरासुर भिरया भगवान्दवत्रामुत ।
तत्कलेवरमादाय मद'र कृत्वा भुव ॥ etc from चित्र quoted in *Bharatakosa*, p 499
5. H —प्राविडतौ 6 P —समनरि
7 P —पलाशसम॰ 8 H —सर्व॰
9 H —स्तत
10 P omits this verse 11 H —ऊचेत्र
12 H —मद्ले 13 P —पाण्योरुत्पन्ना

तद्यथा—

[1]तक्ड दरगड । धिक्(क)ड दरगड । ताधिक्ड । दाधिक्ड । दरगड ।
धिद्धिकड । तातकड । दरगड । तक्ड । दाधिक्ड । दरगड ।
धिक्ड । दरगड । दरगड । ताधिथ(त्थ)उ द्रै ।

शुष्कपत्रोद्भवा पूर्वमुत्पन्ना मुरजेऽपि ते ।
उक्ता शब्दा पञ्चत्रिंशदथ पाटा करोद्भवा[2] ॥ ७२ ॥

नागबन्ध स्वस्तिकश्च शुद्धाख्य स्यादलग्नक[3] ।
समखली (समस्खली) चेति पञ्च मुख्या पाटा प्रकीर्तिता ॥ ७३ ॥

प्रत्येक [4]पञ्च सप्तेते पञ्चत्रिंशद्भवन्त्यत ।
नागबन्धश्च पणव एका एकसरा तथा ॥ ७४ ॥

[5]दूसारा चेव सञ्चारो विचारो नागबन्धगा ।
अथ सप्त स्वस्तिकाद्या स्वस्तिको नलिकोहल ॥ ७५ ॥

फुल्लविक्षेपकश्चैव चारश्च विनिपण्णक[6] ।
खण्डनागश्च निश्वास शुद्धाद्य सप्तक त्वथ[7] ॥ ७६ ॥

[8]शुद्ध स्यात्स्वरस्फुरणा[9] उत्फुल्ला[10] सुप्रियो दम ।
नकारो मानवल्ली स्यादमी थालग्नकसप्तकम्[11] ॥ ७७ ॥

अलग्नक शुद्धरूपो विश्रामो[12] विषमाखली (विषमस्खली)[13] ।
आनन्द शुचिस्फुरणा समखल्यादिक तत ॥ ७८ ॥

---

1 P reads—
तक्ड दरगड । धिक्ड दरगड ताधिक्ड दाधिक्ड दरगड धिद्धिकड
दातकड दरगड तक्ड दाधिक्ड दरगड२ दरगड६ ताधिथो उद्र

2 H—पाटकरोद्भवा ॥

3 H—शुद्ध स्यादथऽलग्नक । 4 P—सप्त

5 P—दूसरा 6 P—विनिपिण्णिक

7. H—त्था 8. H—शुद्ध

9 P—स्फुरण 10. P—उत्फुल्ल.

11 H—स्यादमी लग्नकसप्तकम् । 12 H—विश्रामा

13 P.—विषमार (?) खली

ननगिड । गिडदगि ॥	पणव[1] ॥ २ ॥
ग्डिदि ग्डिदि ॥	एका ॥ ॥ ३ ॥
ननग्डिदि ॥	एकसरा[2] ॥ ४ ॥
नखु नखु ॥	दूसरा ॥ ५ ॥
[3]ख च ट न्टि ॥	सचार ॥ ६ ॥
[4]धिक्ट धिकट ॥	निचार ॥ ७ ॥ १ ॥
थों गि ॥	स्वास्तिक[5] ॥ १ ॥
[6]थों हंत ॥	वलिकोहल ॥ २ ॥
[7]थों गिणि । थों थों गि ॥	फुल्लविक्षेप ॥ ३ ॥
[8]थुदि गण ॥	चार ॥ ४ ॥
क्रिट थों ॥	विनिपि(प)ण्णक[9] ॥ ५ ॥
थों गि खें खें[10] ॥	खण्डनाग ॥ ६ ॥
थिरकट थों[11] ॥	विश्वास ॥ ७ ॥ २ ॥
[12]नहि खहिं गि ॥	शुद्ध ॥ १ ॥
ननगि खहि ॥	स्वरस्फुरण ॥ २ ॥
ननगि नखहि नखहि[13] ॥	उच्छला ॥ ३ ॥
ग्डिदि ग्डिदि खहि ॥	सुप्रिय[14] ॥ ४ ॥
थोंगि खहि[15] ॥	दम ॥ ५ ॥

---

1 पवन acc to स० रत्ना० *op cit* p 400
2 H—एकसिरी एकसर, दूसर etc in स० रत्ना०, p 400
3 H—ख च न हि ट ॥
4 P—ािक धिकट ॥
5 H—था गि ॥ सस्तिक ॥
6 P—थौत हत ॥ वल्कोहर ॥
7. P—थों गिण०
8 H—थुदि । गणचार । P थुदि गण चार ।
9 H—विनिखिलक ।
10 P—था गि खे ख ।
11. P—थिर कट था ।
12 H—र्नहि खहिं ग ।
13 P—ननाग नखहिं खहि ।
14 H—सुप्रया ॥
15 H—थोगि खहिं ।

गिडिदि तत्ता[1] ॥	नकार ॥ ६ ॥
[2]धिद्धि ॥	मानवल्ली ॥ ७ ॥ ३ ॥
ननगिड ग्रिडि दा ॥	अल्मक ॥ १ ॥
थुदिगण कत्थउ ॥	शुद्धरूप[3] ॥ २ ॥
तकि धिकि ॥	विश्राम ॥ ३ ॥
टगु टगु टगु नगु ॥	निपमखल्ली ॥ ४ ॥
तत्तत्त कट ॥	आनन्द ॥ ५ ॥
झें टिगु डि[4] ॥	शुचि ॥ ६ ॥
तत्त गट धिद्धि कट ॥	फुरणा ॥ ७ ॥ ४ ॥
नगि झें नगि झें ॥	समखली ॥ १ ॥
[5]गिद्दि गु गिद्दि गु ॥	विकटा ॥ २ ॥
तक्कत्थउ धि ॥	सुघटा ॥ ३ ॥
झें दथों ॥	अवघटा[6] ॥ ४ ॥
[7]तग्डि तत्ता । तद्धि तत ॥	शुभा ॥ ५ ॥
नगिदि नगि ॥	अड्डुखली[8] ॥ ६ ॥
थरकट । थरकट ॥	अनुच्छल्ला ॥ ७ ॥

पाटा अमी मृदङ्गस्य पञ्चत्रिंशदुदाहृता ।
अन्येऽपि बहवो भेदा कर्त्तरी समकर्त्तरी ॥ ८० ॥
समनख पाणिहस्त स्वस्तिक (को) भ्रमरादय ।
हस्ताभ्या वाद्यरीतिश्च नोक्ता ग्रन्थगुरुत्वत ॥ ८१ ॥
हस्ताभ्या वाद्यते वाद्यमतस्तद्देवता[9] ब्रुवे ।
अङ्गुष्ठे दैवत ब्रह्मा तर्जन्यामाधिप शिव ॥ ८२ ॥

---

1 P —ग्डदिदि तत्वत्ता । 2 H —ढिधि मानवगी
3 H —धुदिगण कथउ । शुद्धरूप । 4 P —झें टिगु थि
5 H —गिद्द गु गिड्ड (?) गु विकग ।
6 H —अवघट्टा 7 P —तद्दि तत्ता तद्धि ताग ।
8 P —अइ (?) खली
9 P —हस्ताभ्यां वाद्य वाद्यमतस्तद्देवता H.—.मतस्ता देवना

मध्यभाया प्रभुर्निष्णु [1]सर्वदेवा त्वनामिका ।
[2]ऋषिस्थान कनिष्ठा स्यात्सूर्यं करतलाधिप[3] ॥ ८४ ॥
मृदङ्गो मर्दलस्तूर्यं मुरज शिवनिर्मितम् ।
तूर नद्ध महावाद्य द्विमुख पाटमागर ॥ ८५ ॥
रुद्रेण नाट्यनृत्यार्थं वाद्य मुरजसज्ञया ।
निर्मित कोतुकादेव तत्नज्ञा कल्पिताम्त्रिति ॥ ८६ ॥
वाद्य लोककृते [4]चान्त सुषिर काष्ठज तत ।
चर्मावनद्ध द्विमुख वृत्त तन्मुरजाह्वति (ति) ॥ ८७ ॥
[5]वसास्थाने निर्मिताश्च चर्मणो [6]वध्रिका इमा ।
[7]गङ्गायमुनके मुख्ये[8] नागपाशाभिधा परा ॥ ८८ ॥
एवमानद्धवाद्येषु[9] मुरजाख्य प्रकीर्तितम् ।
साम्प्रतं शेषवाद्यना किञ्चिल्लक्षणमुच्यते ॥ ८९ ॥

इति मुरजलक्षणम्[10] ॥

चर्मानद्धमुखा ढक्का प्रायेण भूपतेर्हिता ।
[11]नि स्वनो भूपतेर्वाद्य राज्यकार्येषु वाद्यते ॥ ९० ॥
वज्राकृतिस्तु ति(त्रि)वलिर्द्विमुखा नृत्यवाद्यगा[12] ।
पटहा [13]मार्गदेशाद्या भूपदेवगृहादिषु ॥ ९१ ॥
[14]आउजो लोकभाषाया [15]धाउजयश्च खाउजा(सदाउजपग्भाउजो) ।
मता पट्टाउजश्चेति स्वस्वनामानुसारिणि ॥ ९२ ॥

---

1 H —सर्वदेवास्त्वनामिका । 2 P —ऋषिस्थान
3 P.—करतलाभिध ॥
4 P —गकहते वी (?) त 5 P —मसास्थान
6 H —वध्रिकास्त्विमा 7 P —गङ्गायमुनिके
8 H —मुख्या 9 P —एवमानद्धवाद्यऽदा
10. H uses मदल for मुरज everywhere above
11. P —नि स्वानो नृपते॰ 12 P —नृत्यवाद्यगा
13 P —मार्ग॰
14 P —आउजो 15 P —खधाउज पटा श्रना

तथैव मेन्द्रनालानि घोलन्त्कनुमानि[1] तु ।
टगा च 'टानरी नैव डउडि[2] पादचारिणाम् ॥ ९३ ॥

तथा टमगो पुरा 'दुद्दडी तुण्डगी पट' ।
'नर्मारनटान्दन्यान्यधनद्धे गमकान्द' वि) ॥९४॥

इति आनद्धवाद्यलक्षणम् ॥

व्यानायगाङ्गिश मानं म्यं वर्णाहति(   )श्रुतम् ।
वाद्यभागोपविर्गानि 'मन्यन्यानरमातन्म् ॥ ९५ ॥

इत्यादि यन्नयानोक्त मन्येऽस्मिन्वहुतानया ।
'यादवादनरोन्यो भेद तथयथागचि ॥ ९६ ॥ तुलन् ॥

एकहस्मिन्नुयोव नु मत्स्यानगगवा' ।
मर्मावोद्ग मन्यायन्मयुक्तनि(नवि) विवगा' ॥ ९७ ॥

मनपरसुपिगन्यानद्धयानि नानि
प्रनवर्विभिनार्देर्दिन्ननि प्रवन्ना ।
"य इह मन्त्ररन्नेषु मयोत्त मयो
मन्दरी च गुरुन्द गोऽभ्मर्शं [illegible]" ॥ ९८ ॥

इति "[illegible]
[illegible] चतुर्थोऽध्यायः ॥ ४ ॥ ८ ॥

1 H — [illegible]   2 H — [illegible]
3 H — [illegible]   4 H — [illegible]
5 H — [illegible]
6 P — [illegible]
7 H — [illegible]
8 P — [illegible]   9 P — [illegible]
10 H — [illegible]   11 P — [illegible]
12 P — [illegible]   13 H — [illegible]
14 H — [illegible]

पञ्चमोऽध्यायः ।

प्राकारत्रयभूषिते मणिचिते यद्देशनाभूतले[1]
सङ्गीतत्रयतत्परस्त्रिजगतीलोकः सहर्षोऽजनि ।
सच्छत्रत्रितयोपशोभिततनू रत्नत्रयोद्योतक-
[2]स्तस्या प्राप्तिसुबोधिदो जिनपतिर्देयादमेया[3] मुदम् ॥ १ ॥

यस्मात् पञ्चेन्द्रियप्रीतिर्भवेच्च दुःखविस्मृतिः ।
सदा सौख्यकरं तत्तु नृत्यं मूलादथ ब्रुवे ॥ २ ॥

प्रवेशे तीर्थयात्राया तथा भूपाभिषेचने ।
विवाहे पुत्रजन्मादौ उत्सवे नृत्यमिष्यते ॥ ३ ॥

[4]इन्द्राभ्यर्थनया पूर्वं वसिष्ठाय महर्षये ।
उपदिष्टा [5]नृत्यविद्या ब्रह्मणा ज्ञानमूर्तये ॥ ४ ॥

नृत्यं सम्यक् परिज्ञाय स्वपुत्राणां शतेऽपि तत् ।
निवेश्य तच्च पुत्रेभ्यो धात्रग्रे स व्यदर्शयत्[6] ॥ ५ ॥

शतपुत्रयुतो गत्वा सत्पुरंदरदेशतस्तत ।
दर्शयामास तन्नृत्यं शक्राग्रे स्वसुतैर्मुनिः ॥ ६ ॥

[7]इन्द्रोपरोधात्तन्नृत्यं लास्यताण्डवसंयुतम् ।
रम्भोर्वशीमेनकाद्या [8]ऋषिः पुत्रैरशामयत् ॥ ७ ॥

[9]नृत(/च) नरकृतं ज्ञेयं नृत्यं नारीकृतं मतं ।
